श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५२

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness** ***śrīmad āṇḍavan*** **of** ***śrīraṅgam***

[*]This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५२

*वत्सापहारवर्णनम्*

अन्यावतारनिकरेष्वनिरीक्षितं ते
भूमातिरेकमभिवीक्ष्य तदाघमोक्षे।
ब्रह्मा परीक्षितुमनाः स परोक्षभावं
निन्येऽथ वत्सकगणान् प्रवितत्य मायाम्॥ १ ॥

वत्सानवीक्ष्य विवशे पशुपोत्करे ता-
नानेतुकाम इव धातृमतानुवर्ती।
त्वं सामिभुक्तकबलो गतवांस्तदानीं
भुक्तांस्तिरोऽधित सरोजभवः कुमारान्॥ २ ॥

वत्सायितस्तदनु गोपगणायितस्त्वं
शिक्यादिभाण्डमुरलीगवलादिरूपः।
प्राग्वद्विहृत्य विपिनेषु चिराय सायं
त्वं माययाऽथ बहुधा व्रजमाययाथ॥ ३ ॥

त्वामेव शिक्यगवलादिमयं दधानो
भूयस्त्वमेव पशुवत्सकबालरूपः।
गोरूपिणीभिरपि गोपवधूमयीभि-
रासादितोऽसि जननीभिरतिप्रहर्षात्॥ ४ ॥

जीवं हि कञ्चिदभिमानवशात्स्वकीयं
मत्वा तनूज इति रागभरं वहन्त्यः।
आत्मानमेव तु भवन्तमवाप्य सूनुं
प्रीतिं ययुर्न कियतीं वनिताश्च गावः॥ ५ ॥

www.prapatti.com

एवं प्रतिक्षणविजृम्भितहर्षभार-
    निश्शेषगोपगणलालितभूरिमूर्तिम्।
त्वामग्रजोऽपि बुबुधे किल वत्सरान्ते
    ब्रह्मात्मनोरपि महान् युवयोर्विशेषः॥ ६ ॥

वर्षावधौ नवपुरातनवत्सपालान्
    दृष्ट्वा विवेकमसृणे द्रुहिणे विमूढे।
प्रादीदृशः प्रतिनवान् मकुटाङ्गदादि-
    भूषांश्चतुर्भुजयुजः सजलाम्बुदाभान्॥ ७ ॥

प्रत्येकमेव कमलापरिलालिताङ्गान्
    भोगीन्द्रभोगशयनान् नयनाभिरामान्।
लीलानिमीलितदृशः सनकादियोगि-
    व्यासेवितान् कमलभूर्भवतो ददर्श॥ ८ ॥

नारायणाकृतिमसङ्ख्यतमां निरीक्ष्य
    सर्वत्र सेवकमपि स्वमवेक्ष्य धाता।
मायानिमग्नहृदयो विमुमोह याव-
    देको बभूविथ तदा कबलार्धपाणिः॥ ९ ॥

नश्यन्मदे तदनु विश्वपतिं मुहुस्त्वां
    नत्वा च नूतवति धातरि धाम याते।
पोतैः समं प्रमुदितैः प्रविशन् निकेतं
    वातालयाधिप विभो परिपाहि रोगात्॥ १० ॥

**********



www.prapatti.com